## त्रिनवत्यधिकशततमः सर्गः

श्रीराम उवाच ।
अनादिमध्यपर्यन्तं न देवा नर्षयो विदुः ।
यत्पदं तदिदं भाति क्व जगत्क्व च दृश्यता ॥ १
द्वैताद्वैतसमुद्भेदवाक्यसंदेहविभ्रमैः ।
अलमस्माकमाशान्तमाद्यं रूपमनामयम् ॥ २
व्योमनि व्योमभावानां प्रशान्तं यादृगासितम् ।
तादृक्चिद्व्योमनि स्फारत्रिजगद्व्योमभासनम् ॥ ३
यथा व्योमनि व्योमत्वं दृषत्त्वं दृषदि स्थितम् ।
जलत्वं च जलस्यान्तर्जगत्त्वं चिद्घने तथा ॥ ४
साहंतादिजगद्दृश्यमाशाकाशविसार्यपि ।
महाचिदुदरं विद्धि खं शान्तं शून्यतोदितम् ॥ ५
जीवस्यास्मिन्विमूढस्य परेऽपरिमितोदये ।
प्रस्फुरंश्चापि संसारपिशाच उपशाम्यति ॥ ६
भेदोपलब्धिर्गलति व्यवहारवतोऽप्यलम् ।
जडस्येवाजडस्यैव वीचेरिव जलोदरे ॥ ७



क्वाप्यज्ञानरवौ याते प्रतापाढ्याकरे भृशम् ।
संसारसत्तादिवसो यात्यस्तं न निशागमः ॥ ८
भावाभावेषु कार्येषु जरामरणजन्मसु ।
ज्ञ आजवं जवीभावे तिष्ठन्नपि न तिष्ठति ॥ ९
नाविद्यास्ति ह न भ्रान्तिर्न दुःखं न सुखोदयः ।
विद्याऽविद्या सुखं दुःखमिति ब्रह्मैव निर्मलम् ॥ १०
परिज्ञातं सदेतत्तु यावद्ब्रह्मैव निर्मलम् ।
अपरिज्ञातमस्माकमब्रह्मात्म न विद्यते ॥ ११
प्रबुद्धोऽस्मि प्रशान्ता मे सर्वा एव कुदृष्टयः ।
शान्तं समं सोहमिदं खं पश्यामि जगत्त्रयम् ॥ १२
सम्यग्ज्ञातं यावदिदं जगद्ब्रह्मैव केवलम् ।
अज्ञातात्माभवद्ब्रह्म ज्ञातात्मन्यधुना स्थितम् ॥ १३
ज्ञाताज्ञातमनिर्भासं ब्रह्मैकमजरं तथा ।
शून्यत्वैकत्वनीलत्वरूपमेकं नभो यथा ॥ १४

निर्वाणमासे गतशङ्कमासे
निरीहमासे सुसुखेऽहमासे ।
यथास्थितं नित्यमनन्तमासे
तदेवमासे न कथं समासे ॥ १५
सर्वं सदैवाहमनन्तमेकं
न किंचिदेवाप्यथवातिशान्तः ।
सर्वं न किंचिच्च सदेकमस्मि
न चास्मि चेतीयमहो नु शान्तिः ॥ १६
अधिगतमधिगम्यं प्राप्तमप्राप्तमन्यै-
र्गतमिदमलमस्तं वस्तुजातं समस्तम् ।

उदितमुदितबोधं तादृशं यत्र भूयो-
ऽस्तमयसमुदयानां नाम नामापि नास्ति ॥ १७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये देवदूतोक्ते मोक्षोपायेषु निर्वाणप्रकरणे उत्तरार्धे विश्रान्तिकथनं नाम त्रिनवत्यधिकशततमः सर्गः ॥ १९३ ॥